# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – आचार्यः (SEM-2)** **प्रश्नपत्रम् – 2** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.C.4.2.4** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –11/04/2019 सन्दर्भग्रन्थः – निर्णयसिन्धौ प्रथमपरिच्छेदः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 एकस्य ससन्दर्भप्रसङ्गं व्याख्या विधेया।** **05**

(1) एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि।
वनस्थयतिधर्मोऽयं शुक्लामेव सदा गृही ॥

(2) यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेत्तरा।
तुल्ये ते मन्यते यस्तु स वै वैष्णव उच्यते ॥

**प्रश्नः-2 एकस्य निबन्धात्मकमुत्तरं लेख्यम्।** **10**

(1) दशमीशेषसंयुक्तैकादशीव्रतकरणे प्रायश्चित्तम्।

(2) एकादशीव्रताधिकारी व्रताकरणे प्रायश्चित्तं च।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 एकस्य ससन्दर्भप्रसङ्गं व्याख्या विधेया।** **05**

(1) सूतके मृतके चैव न त्याज्यं द्वादशीव्रतम्।
सूतकान्ते नरः स्नात्वा पूजयित्वा जनार्दनम् ॥
दानं दत्त्वा विधानेन व्रतस्य फलमश्नुते ॥

(2) यदा भवति अल्पाऽपि द्वादशी पारणादिने।
उषःकाले द्वयं कुर्यात् प्रातर्मध्याह्निकं तदा ॥

**प्रश्नः-4 एकस्य निबन्धात्मकमुत्तरं लेख्यम्।** **10**

(1) पारणाविचारः।

(2) अष्टौ महाद्वादश्यः।

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः-5 एकस्य ससन्दर्भप्रसङ्गं व्याख्या विधेया।** **05**

(1) पितृयज्ञात्यये चैव वैश्वदेव्यात्ययेऽपि च।
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ॥

(2) अहो मुहूर्ता विज्ञेया दश पञ्च च सर्वदा।

तत्राष्टमो मुहूर्तो यः स कालः कुतुपः स्मृतः ॥

**प्रश्नः-6 एकस्य निबन्धात्मकमुत्तरं लेख्यम्।** **10**

(1) "चन्द्रादिग्रहणे भोजनविचारः" अस्मिन् विषये निबन्धो लेख्यः।

(2) कुतुपकालश्रवणम् – शीर्षकमिदं स्वपाठ्यग्रन्थानुसारं मण्डयत।

**चतुर्थान्वितिः (Unit-4)**

**प्रश्नः-7 एकस्य ससन्दर्भप्रसङ्गं व्याख्या विधेया।** **05**

(1) पुनाति पर्वणि स्नानात्तर्पणैः सरितां पतिः।

कदाचिदपि नैवात्र स्नानं कुर्यादपर्वणि ॥

(2) पिप्पलादं विकण्वं च कृतान्तंजीविकेश्वरम्।

वसिष्ठं वामदेवं च पराशरमुमापतिम् ॥ ..... एतांस्तु तर्पयेद्विद्वान् जलमध्ये विशेषतः।

**प्रश्नः-8 एकस्य निबन्धात्मकमुत्तरं लेख्यम्।** **10**

(1) तीर्थविशेषे दानविशेषः।

(2) समुद्रे स्नानविधिः तत्कालश्च।

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) निर्णयसिन्धुः – इत्यस्य प्रणेता कः?

(2) द्वादशी कीदृशी उपोष्या ?

(3) उपवासे तथा श्राद्धे किं न कुर्यात् ?

(4) उपवासफलं प्रेप्सुःकीदृशं जलं पिबेत्?

(5) अष्टाक्षरो मन्त्रः कः ?

(6) उपवासो नाम किम् ?

(7) सूर्यग्रहे कदा नाश्नीयात् ?

(8) कदा अहोरात्रं न भोक्तव्यम्?

(9) चन्द्रादिग्रहणे उपवासादिना किं फलम् ?

(10) चन्द्रसूर्ययोः ग्रहणे कुत्र स्नानं कुर्वीत ?

(11) नारी कदा त्रिरात्रमशुचिर्भवेत् ?

(12) मङ्गलेषु ऋतुत्रयं किं त्याज्यम्?

(13) दैवज्ञः - इत्यस्यार्थः कः?

(14) इन्दुधरो देवः कः?

(15) कालनियमः कुत्र न भवति ?